## संक्षेपः। (Synopsis)

जन्मकुण्डल्यां कुटुम्ब-सुत-कलत्र भावत्रिकम् - एकमध्ययनमिति शोधनिबन्धः निम्नलिखितप्रकारेण संशोधनविषयान् प्रस्तोति।

प्रथमं तावत् प्रमाणपत्रद्वयं तदनु पुरोवचने प्रस्तुतसंशोधनस्य कारणं प्रयोजनं च प्रदर्शयित्वाऽस्मिन् शोधनिबन्धे येषां येषां वन्दनीयानां गुरूणां सुहृदां च साहाय्यमधिगत्य जीवनस्य चरमोऽर्थः पारितस्तेषां तेषां च नामोल्लेखं कृत्वोपकारप्रदर्शनं कृतं मया।

प्रस्तुतेऽस्मिन् शोधनिबन्धे **अष्ट** प्रकरणानि <u>दृष्टि</u>नामधेयानि सन्ति।

प्रथमादृष्टिः - **ज्योतिषशास्त्रेतिहासः।** अत्र ऋग्वेदादारभ्य मध्यकालीनाधुनिककालपर्यन्तं प्राप्तानां ज्यौतिषसम्बधितविषयाणां पदार्थानां निरूपणं चर्चासहितं प्रस्तुतम्। तत्र-

| | | |
|---|---|---|
| ०१ सूर्यः। | ०२ चन्द्रः। | ०३ ग्रहगतिः। |
| ०४ संवत्सरो वर्षं वा। | ०५ अयनम्। | ०६ ऋतवः। |
| ०७ मासाः। | ०८ पक्षः। | ०९ पूर्णिमा। |
| १० अमावास्या। | ११ तिथिः। | १२ अहोरात्रम्। |
| १३ वासरः। | १४ मुहूर्तम्। | १५ ग्रहणम्। |
| १६ अन्तरिक्षम्। | १७ पृथ्वी। | १८ द्युलोकः। |

इति विषयचर्चा सोदाहरणं प्रस्तुता।

अस्यामेवदृष्ट्यां अर्वाचीनकाले ज्यौतिषविषये सम्मानितानां विद्वत्मूर्धन्यानां श्रीमतां शङ्कर-बालकृष्ण-दीक्षितचरणानां महत्त्वपूर्णग्रन्थस्य ''भारतीयज्यौतिषशास्त्र-इतिहास'' इत्याख्यस्याऽमूलचूलम् अध्ययनं सोदाहरणं

विशदीकृतं वर्तते। अत्रैव गणकतरङ्गिणी जातकपारिजातो बृहज्जातकमित्यादीनाम् अभ्यासः प्रस्तुतः। बृहत्तसंहितादिनाम् आकरग्रन्थाानामपि चर्चाप्रदर्शिता वर्त्तते।

द्वितीयादृष्टिः – **जन्मकुण्डल्यां भावविचारः।** अत्र जन्मकुण्डल्यां देशविभागानुसारं लेखनस्य यानि त्रीणिप्रकाराणि प्रचलितानि सचित्राणि व्याख्यातानि। तथा च जातकस्य जन्मकुण्डल्यां प्रथमादिद्वादशभावेषु स्थितानां सूर्यादिग्रहाणां बलाबलविचारः फलनियमं च विशदीकृते।

तृतीयादृष्टिः – **जन्मकुण्डल्यां विशेषयुतीनां विचारः।** यस्यां दृष्ट्यां जन्मकुण्डलीस्थितानां ग्रहाणां अन्यैर्ग्रहैः सह सञ्जातानां युतीनां सामान्यविचारः प्रस्तुतः। तथा च द्वितीय–पञ्चम–सप्तमभावेषु कुटुम्ब–सुत–कलत्राख्येषु सूर्यादि–ग्रहाणां द्विग्रहादिसप्तग्रहाणां विशेषयुतीनां विचारोऽपि प्रदर्शितः।

चतुर्थीदृष्टिः – जन्मकुण्डल्यां ग्रहाणां दृष्टिविचारः। जन्मकुण्डल्यां सूर्यचन्द्रमङ्गलादिग्रहाणामन्यान्यक्षेत्रस्थानां दृष्टिर्जातकस्य जीवने प्रभावं दर्शयति। तेषां ग्रहाणां मेषवृषभादिराशिपतीनां क्षेत्रेषु स्थित्वा प्रभावस्य यत्फलं भवति तस्य विचारः कृतः।

पञ्चमीदृष्टिः – **जन्मकुण्डल्यां कुटुम्बभावस्य विचारः।** जातकस्य जन्मकुण्डल्यां द्वितीयभावस्य**कुटुंब**भाव इति नामान्तरम्। अत्र कुटुम्बभावस्य अर्थः प्रयोजनं च तत्र च स्थितानां उच्चनीचादिग्रहाणां क्षेत्रपरत्वे यद्यत् शास्त्रेषु प्रदिष्टम् अनुभवे च प्रसिद्धं तस्य तस्य चर्चाविचारः प्रस्तुतः।

षष्ठीदृष्टिः – **जन्मकुण्डल्यां सुतभावस्य विचारः।** जातकस्य जन्मकुण्डल्यां पञ्चमभाव सुतभाव इति कथ्यते। अत्र सुतभावस्य अर्थः सप्रयोजनं भावफलं तथा च पञ्चमभावे स्थितानां उच्चनीचादिग्रहाणां क्षेत्रपरत्वे यद्यत् फलं शास्त्रेषु लक्षितं अनुभवे च दृष्टं तस्य तस्य परामर्शः प्रस्तुतः।

सप्तमीदृष्टिः – **जन्मकुण्डल्यां कलत्रभावस्य विचारः।** जातकस्य जन्मकुण्डल्यां सप्तमभाव एव कलत्रभा इति प्रसिद्धम्। अत्र कलत्रभास्य अर्थः प्रयोजनं भावफलं ततश्च स्थितानां उच्चनीचादिग्रहाणां क्षेत्रपरत्वे यद्यत् फलं शास्त्रेषु प्रथितं अनुभवेन प्रसिद्धं तस्य तस्य चर्चा विशदीकृता।

अष्टमीदृष्टिः – **उपसंहारः।**

**अस्य**प्रकरणान्ते सप्त (०७) परिशिष्टानि सन्ति।

०१ शोधनिबन्धसम्बन्धितकुण्डलीनां सङ्ग्रहः।
०२ होरादि–दशवर्गाणां परिचयः।
०३ सूर्यादिग्रहाणां विविधाः संज्ञाः।
०४ प्रथमादि–द्वादशभावानां विविधाः संज्ञाः।
०५ मेषादि–मीनान्तानां राशीनां विविधाः संज्ञाः।
०६ तिथ्यादि–पञ्चाङ्गविषयाः।
०७ सूर्यादिग्रहाणाम् अरिष्टपरिहारोपायाः।

अस्य प्रस्तुत शोधनिबन्धस्य समापनपूर्वं **सन्दर्भग्रन्थसूची** प्रदत्ता।

– x – x – x –

# संक्षेपसूचि।

| | |
|---|---|
| अम.को. | = अमरकोशः। |
| अभि.शा. | = अभिज्ञानशाकुन्तलः। |
| अथ.सं. | = अथर्ववेद संहिता। |
| अनु. | = अनुवादकः। |
| आश्व.सू. | = आश्वलायनसूत्रं। |
| उ.का. | = उत्तरकालामृत। |
| ऐ.ब्रा. | = ऐतरीय ब्राह्मण। |
| क.सं. | = कश्यपसंहिता। |
| कु.सं. | = कुमारसंभवम्। |
| ग्रन्थ. | = ग्रन्थकारः। |
| गो.ब्रा. | = गोपथ ब्राह्मणः। |
| च.चि. | = चमत्कार चिन्तामणिः। |
| जा.त. | = जातक तत्त्वम्। |
| जा.त.सं.त. | = जातकतत्तवंसंज्ञातत्तवम्। |
| जा.त.पं.वि. | = जातकतत्तवंपञ्चमविवेकः। |
| जा.त.स.वि. | = जातकतत्तवंसप्तमविवेकः। |
| जा.भ. | = जातका भरणम्। |
| जा.पा. | = जातक पारिजातः। |
| जा.लं. | = जातकालङ्कारः। |
| जै.सूत्र. | = जैमिनी सूत्रम्। |
| ज्यो.श्या.सं. | = ज्योतिषश्यामसंग्रहः। |
| तै.ब्रा. | = तैत्तिरीय ब्राह्मणः। |
| ते.सं. | = तैत्तिरीयसंहिता। |
| दु.अ. | = दुर्गाअर्गलास्तोत्रम्। |
| दु.स. | = दुर्गासप्तशती। |
| द्वि.वि. | = द्वितीय विवेकः। |
| नि.पू. | = नित्यकर्म–पूजाप्रकाश। |

| | |
|---|---|
| नपु. | = नपुंसकलिङ्गम्। |
| ना.सं. | = नारदसंहिता। |
| पा.गु.सू. | = पारस्कर गुह्यसूत्रम्। |
| पु. | = पुलिङ्गम्। |
| परि.कु.क्र. | = परिशिष्टकुण्डलीक्रमाङ्कः। |
| पं.वि. | = पञ्चमविवेकः। |
| पाणि.सू. | = पाणिनियसूत्रम्। |
| प्र. | = प्रकाशकः। |
| प्र.वि. | = प्रथमविवेकः। |
| फ.दी. | = फलादीपिका। |
| बा.ज्यो.सा.स. | = बालबोधज्योतिषसारसमुच्चयः। |
| बृ.जा. | = बृहज्जातकम्। |
| बृ.पा.हो.शा. | = बृहत्पाराशरहोराशास्त्रम्। |
| बृ.र. | = बृहत्स्तोत्ररत्नाकरः। |
| बृ.सं. | = बृहत्संहिता। |
| ब्र.कर्म.स. | = बहद् ब्रह्मनित्यकर्मसमुच्चयः। |
| मु.चि. | = मुहूर्त चिंतामणि। |
| मु.मा. | = मुहूर्ते मार्तंडः। |
| म.स्मृ. | = मनु स्मृतिः। |
| मा.सा. | = मानसागरी। |
| भा.ज्यो. | = भारतीय ज्योतिष । |
| भा.ज्यो.पृ. | = भारतीय ज्योतिष। पृष्ठ |
| वि.च. | = विवाहचन्द्रिका। |
| वि.सुख. | = विवाहीक सुख। |
| वृद्ध.य.जा. | = वृद्धयवनजातकम्। |
| व्या. | = व्याख्याकारः । |
| ऋ.स. | = ऋग्वेदसंहिता। |
| स.क.अ.प्र. | = सर्वकर्म अनुष्ठान प्रकशः। |

| | |
|---|---|
| सं.वै.यं.मं.प्र. | = संक्षप्ति वैष्णव यन्त्र-मन्त्र प्रयोगाली। |
| सू.सि. | = सूर्यसिद्धान्तः। |
| सारावली | = सारावली। |
| स.सूत्र. | = समृद्धिसूत्रम्। |
| साम.स. | = सामवेदसंहिता। |
| स्त्री.जा. | = स्त्रीजातकम्। |
| स्त्री.लि. | = स्त्रीलिङ्गम्। |
| शत.ब्रा. | = शतपथ ब्राह्मणः। |
| शा.र. | = शान्तिरत्नम्। |
| शु.य.म.व.सं. | = श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिसंहिता। |
| श्रीभा.मा. | = श्रीमद्भागवतमहापुराणम्। |
| श्रीव्रतो.च. | = श्रीव्रतोद्यापनचन्द्रिका। |
| श्रौ.सू. | = श्रौत सूत्रम्। |
| स.ना.स्तो.सं. | = सहस्रनामस्तोत्रसंग्रह। |
| सं. | = सम्पादकः । |
| स.वि. | = सप्तमविवेकः। |